# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. THIRD SEMESTER EXAMINATION, DECEMBER 2019**

**SECOND YEAR [BATCH 2018-21]**

**SANSKRIT [General]**

**Paper : III**

Date : 21/12/2019

Time : 11 am – 2 pm

Full Marks : 75

1. यथेच्छ**मेकस्य** प्रश्नस्योत्तरं प्रदेयम्। [1×12]

क) शकुन्तलां प्रति कः कथमभिशापं प्रदत्तवान्? नाटके तस्य अभिशापस्य प्रदाने किं तात्पर्यं विद्यत इति विशद्यताम्।

ख) अभिज्ञानशकुन्तलम् इति नाटके वर्णितस्य विदूषकस्य चरित्रम् उपस्थाप्यताम्।

2. यथाभिमतं **चत्वारः** प्रश्नाः समाधेयाः। [4×2]

क) अभिज्ञानशकुन्तलस्य नान्दीश्लोके उल्लिखिता अष्टमूर्तयः काः?

ख) शकुन्तलायाः पितुः मातुश्च नाम किम्?

ग) कण्वमुनेः आश्रमः कुत्र आसीत्?
कस्मिन् कस्मिन् अङ्के कण्वमुनेः उपस्थितिः दृश्यते?

घ) का नाम हंसपदिका?

ङ) अभिज्ञानशकुन्तलनाटके विदूषकस्य नाम किम्?

च) कस्मिन् सरोवरे शकुन्तलाया अङ्गुरीयकं प्रनष्टम्?

छ) शकुन्तलायाः पतिगृहयात्रावर्णना कस्मिन् अङ्के वर्तते? तस्या यात्रान्ते कण्वमुनिः किम् अनुभूतवान्?

3. वङ्गभाषया पद्यस्**यैकस्या**नुवादः कार्यः। [1×6]

क) मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः।।

ख) स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम्।
असन्निवृत्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः।।

4. यथेच्छ**मेका** व्याख्या कार्या। [1×8]

क) इदं किलाव्याजमनोहरं वपु–
स्तमःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति।।

ख) शमप्रधानेषु तपोधनेषु
गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्ता –
स्तदन्यतेजोऽभिभवाद् वमन्ति।।

5. यथेच्छ**मेकस्य** भावसम्प्रसारणं क्रियताम्। [1×6]

क) अर्थो हि कन्या परकीय एव।

ख) दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः।

**अथवा**

यथेच्छं संक्षिप्तटीका**द्वयं** लेखनीयम्। [2×3]

भरतवाक्यम्, विष्कम्भकः, प्रस्तावना, सूत्रधारः।

6. **एकः** प्रश्नः समाधेयः। [1×10]

क) दण्डस्योत्पत्तिविषये माहात्म्यविषये च मनोरभिमतं वर्ण्यताम्।

ख) दुर्गविषये एकः प्रबन्धः लिख्यताम्।

7. **एकः** अनुवादः करणीयः। [1×5]

क) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति।।

ख) ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्।।

8. **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×6]

क) **एका** व्याख्या कार्या।

a) यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः।।

b) पात्रस्य हि विशेषेण श्रद्धधानतयैव च।
अल्पं वा बहु वा प्रेत्य दानस्य फलमश्नुते।।

**अथवा**

ख) टीका**द्वयं** लेख्यम्। [2×3]

त्रयी, मात्स्यन्यायः, तौर्यत्रिकम्, उपायचतुष्टयम्।

9. प्रश्न**द्वयं** समाधेयम्। [2×2]

क) मनुसंहितायाः टीकाकारस्य तथा टीकायाः नाम लिख्यताम्।

ख) केषां सारभूतानंशानाकृष्य नृपस्य सृष्टिः ?

ग) विनयवशतः के राज्यं लभन्ते स्म ?

घ) राज्ञः श्रेष्ठधर्मः कः ?

10. **एकस्य** अनुच्छेदस्य अनुवादः करणीयः। [1×10]

क) तत्र एकेन धूर्तेन गच्छन् स ब्राह्मणोऽभिहितः – "भो ब्राह्मण! किमिति त्वया कुक्कुरः स्कन्धेनोह्यते ?" विप्रेण उक्तम् – "नायं श्वा किन्तु यज्ञछागः।" अनन्तरं पुनः द्वितीयेन धूर्तेन क्रोशमवस्थितेन तदेवोक्तम्। तदाकर्ण्य ब्राह्मणः छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः।

ख) अस्माकं देशे षड् ऋतवः वर्तन्ते। ते यथाक्रमम् आगच्छन्ति गच्छन्ति। ऋतुपरिवर्तनेन मानवानां मध्ये परिवर्तनं दृश्यते। विशेषतः शरत्कालः सर्वेषां प्रियः। सर्वे मानवाः सर्वदा इमं कालमेव अपेक्षन्ते। शरत्काले प्रकृतिरपि अपूर्वां शोभां धत्ते। सर्वत्र अवकाशः वर्तते। अतः मानवाः सर्वं परित्यज्य केवलम् आनन्दसागरे निमज्जन्ति।

——— × ———